2024

संस्कृतवेदाध्ययनम्

MASVSC301

वाजसनेयिमाध्यन्दिनशुक्लयजुर्वेदसंहिता

पूर्णाङ्क: 80

समय: घण्टात्रयम्

*The figures in the margin indicate full mark for the questions:*

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् - 1×10=10

1. शतरुद्रियहोममन्त्रा: शुक्लयजुर्वेदस्य कस्मिन् अध्याये समुपलभ्यन्ते ?
2. “नमस्ते रुद्रमन्यव उतो त इषवे नम:” इति मन्त्रांश:कुत्रोपलभ्यते ?
3. शुक्लयजुर्वेदेकति अध्याया:सन्ति?
4. ‘रुद्र’शब्दस्य व्युत्पत्ति:क: ?
5. “परासुव” इति शब्दस्य कोऽर्थ:?
6. पुरूषमेधयागेकति मन्त्रा: सन्ति ?
7. ‘राधस:’वैदिक शब्दस्य कोऽर्थ: ?
8. प्रजापतिसूक्तंशुक्लयजुर्वेदस्यकस्मिन् अध्यायेसमुपलभ्यते ?
9. शिवसंकल्पसूक्तस्य देवता का ?
10. शिवसंकल्पसूक्तेकति मन्त्रा: सन्ति?

अधस्तनेषु पञ्चानां व्याख्या करणीया - 6×5=30

11. या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।
    तयानस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि॥
12. शिवेन वचसा त्वा गिरिशाऽच्छावदामसि।
    यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत्॥
13. तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
    धियोयो न:प्रचोदयात्॥
14. य:प्राणतो निमिषतोमहित्वैकइद्राजाजगतो बभूव।
    यईशे अस्य द्विपदश्चतुष्पद:कस्मैदेवायहविषा विधेम॥
15. युञ्जन्ति ब्रध्नमरूषंचरन्तंपरितस्थुष:।
    रोचन्ते रोचना दिवि॥
16. यज्जाग्रतोदूरमुदैतिदैवंतदुसुप्तस्यतथैवैति।
    दूरंगमंज्योतिषांज्योतिरेकंतन्मेमन:शिवसंकल्पमस्तु॥
17. येनकर्माण्यपसोमनीषिणो यज्ञे कृण्वन्ति विदथेषु धीरा:।
    यदपूर्वं यक्षमन्त: प्रजानांतन्मे मन: शिवसंकल्पमस्तु॥

निम्नोक्तप्रश्नेषु चतुर्णामुत्तरं प्रदेयम् - 10×4=40

18. शतरुद्रियाध्यायानुसारं रुद्रस्य स्वरूपं प्रतिपादयताम् ।
19. शुक्लयजुर्वेदमधिकृत्य एको लेख: पेरसेतूयताम्
20. पुरूषमेधयागस्यप्रासंगिकताप्रस्तूयताम्।
21. पुरूषमेधयागस्यप्रतिपाद्यविषय:लिख्यताम्।
22. प्रजापतिसूक्तस्यसारांश: लिख्यताम्।
23. शिवसंकल्पसूक्तानुसारंमनस:स्वरूपं प्रस्तुयताम्

****

**2024**
**संस्कृतवेदाध्ययनम्**
**MASVSC302**
**ब्राह्मणसाहित्यम्**
**पूर्णाङ्कः 80**
**समयः घण्टात्रयम्**

*The figures in the margin indicate full mark for the questions:*

**अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् -** **1×10=10**

1. विधि-शब्दस्यार्थः कः?
2. षड्विंशब्राह्मणं कस्य वेदस्य अन्तर्गतमस्ति ?
3. प्राचीनतमो ब्राह्मणग्रन्थः कः?
4. 'मेध्यः' इति पदस्य कोऽर्थः ?
5. हरिश्चन्द्रस्य वंशस्य नाम किम् ?
6. को मार्गः शास्त्रज्ञैः राजामात्यादिभिश्च गीयते ?
7. हरिश्चन्द्रस्य राजसूयानुष्ठाने होता कोऽस्ति ?
8. दर्शपौर्णमासयागे कति संख्यकाः यागाः सन्ति ?
9. अतिथियागस्य अपरं नाम किम् ?
10. अग्निहोत्रयागे प्रातःकालस्य देवता का ?

**अधस्तनेषु पञ्चानां टिप्पणी प्रदेया -** **6×5=30**

11. शतपथब्राह्मणम्
12. गोपथब्राह्मणम्
13. तैत्तिरीयब्राह्मणम्
14. ऐतरेयब्राह्मणम्
15. यज्ञसंस्थाः
16. दर्शपौर्णमासः
17. पञ्चमहायज्ञः

**निम्नोक्तप्रश्नेषु चतुर्णामुत्तरं प्रदेयम् -** **10×4=40**

18. ब्राह्मणमधिकृत्य एको निबन्धः प्रस्तूयताम्।
19. ब्राह्मणग्रन्थानां प्रतिपाद्यविषयाः वर्ण्यन्ताम्।
20. शुनःशेपाख्यानस्य माहात्म्यं प्रदर्श्यताम्।
21. यज्ञस्वरूपम् संक्षेपेण उपस्थाप्यताम्।
22. अग्निहोत्रयागस्य स्वरूपं प्रतिपाद्यताम्।
23. अग्निष्टोमयागस्य स्वरूपं उपस्थाप्यताम्।

****

**2024**

**संस्कृतवेदाध्ययनम्**

**MASVSC303**

**उपनिषत्साहित्यम्-३**

**पूर्णाङ्काः - 80**

**समयः - घण्टात्रयम्**

*The figures in the margin indicate full mark for the questions:*

**अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् -** **1×10=10**

1. तैत्तिरीयोपनिषद् कस्य वेदस्यान्तर्गता ?
2. ब्रह्मानन्दवल्यां कति अनुवाकाः सन्ति?
3. तैत्तिरीयोपनिषदनुसारम् अन्नात् किमुत्पद्यते?
4. यमनचिकेतसोः संवादः कस्यामुपनिषदि प्राप्यते ?
5. 'उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत' इति कुत्र उपदिष्टम् ?
6. नचिकेता कस्य पुत्र आसीत् ?
7. केनोपनिषदि कति खण्डानि सन्ति ?
8. उमा–हैमवती–आख्यानं कुत्र प्राप्यते ?
9. मातरिश्वान् कोऽस्ति ?
10. जातवेदस् कस्य देवस्य उपाधिविशेषः ?

**अधस्तनेषु पञ्चानां यथानिर्देशं समाधेयम् -** **6×5=30**

11. तस्माद्वा एतस्मादात्मन आकाशः संभूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात्पुरुषः। स वा एष पुरुषोऽन्नरसमयः। - व्याख्यायताम्
12. तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा। - व्याख्यायताम्
13. प्रश्नोपनिषत् - टिप्पणी प्रदेया ।
14. उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।<br>क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति ।। - व्याख्यायताम्
15. न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।<br>अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ।। - व्याख्यायताम्
16. न तत्र चक्षुर्गच्छति न वाग् गच्छति नो मनो।<br>न विद्मो न विजानीमो यथैतदनुशिष्यात् ।। - व्याख्यायताम्
17. अन्यदेव तद्विदितादथो अविदितादधि।<br>इति शुश्रुम पूर्वेषां ये नस्तद् व्याचचक्षिरे ।। - व्याख्यायताम्

**निम्नोक्तप्रश्नेषु चतुर्णामुत्तरं प्रदेयम् -** **10×4=40**

18. उपनिषत्साहित्यमधिकृत्य एको लेखः प्रस्तूयताम्।
19. तैत्तिरीयोपनिषदनुसारं पञ्चकोशविवेकः प्रतिपाद्यताम्।
20. कठोपनिषदः महत्त्वं वैशिष्ट्यञ्च प्रतिपाद्यताम्।
21. कठोपनिषदनुसारं यमनचिकेताख्यानं विवर्ण्यताम्।
22. कठोपनिषदनुसारं रथरूपकस्य वर्णनं प्रस्तूयताम्।
23. केनोपनिषदानुसारम् आत्माविषयकवर्णनमुपस्थाप्यताम्।

****

**2024**

**संस्कृतवेदाध्ययनम्**

**MASVE304**

**वेदेषु पर्यावरणम्**

**पूर्णाङ्का: - 80**

**समय: - घण्टात्रयम्**

*The figures in the margin indicate full mark for the questions:*

**अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् -** **1×10=10**

1. ऋग्वेदस्य अपरं नाम किम्?
2. वेदशब्दस्य व्युत्पत्तिः का ?
3. अथर्ववेदे कति काण्डानि सन्ति ?
4. बृहत्संहिता कस्य कृतिः वर्तते ?
5. 'द्यौः शान्तिरन्तरिक्षं शान्तिः' - कुत्र उपलभ्यते ?
6. माता _ पुत्रो अहं _ । (रिक्तस्थानानि पूरयत)
7. पर्जन्यसूक्तस्य ऋषिः कः ?
8. 'रथीव' पदस्य सायणभाष्यानुसारं कोऽर्थः ?
9. अग्निमरुतसूक्तस्य विनियोगः कः ?
10. पृथिवीसूक्ते कति मन्त्राः सन्ति ?

**अधस्तनेषु पञ्चानां यथानिर्देशं समाधेयम् -** **6×5=30**

11. यजुर्वेदः - टिप्पणी प्रदेया ।
12. वेदानां महत्त्वम् - टिप्पणी प्रदेया ।
13. आकाशतत्त्वम् - टिप्पणी प्रदेया ।
14. अग्नितत्त्वम् - टिप्पणी प्रदेया ।
15. रथीव कशयाश्वा अभिक्षिपन्नाविर्दूतान्कृणुते वर्षा अह ।<br>दूरात्सिंहस्य स्तनथा उदीरते यत्पर्जन्यः कृणुते वर्ष्यं नभः ।। - व्याख्यायताम्
16. प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे । मरुद्भिरग्न आ गहि ।। - व्याख्यायताम्
17. सत्यं बृहदृतमुग्रं दीक्षा तपोब्रह्म यज्ञः पृथिवीं धारयन्ति।<br>सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु ।। - व्याख्यायताम्

**निम्नोक्तप्रश्नेषु चतुर्णामुत्तरं प्रदेयम् -** **10×4=40**

18. सामवेदमधिकृत्य एको लेखः प्रस्तूयताम् ।
19. पर्यावरणस्य स्वरूपम् उपस्थाप्यताम् ।
20. पञ्चतत्त्वानां स्वरूपं प्रतिपाद्यताम् ।
21. पर्जन्यसूक्तस्य महत्त्वम् प्रतिपाद्यताम् ।
22. अग्निमरुतदेवस्य महत्त्वं प्रस्तूयताम् ।
23. पृथिवीसूक्तस्य सारांशः प्रदीयताम् ।

****